IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# वाल्मीकिविरचित श्रीमद्रामायणे यज्ञविश्लेषणम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

संस्कृतवाङ्मयं लौकिक-वैदिकभेदेन द्विविधम्। तत्राऽपि कृत्स्नस्य वाङ्मयस्य त्रैविध्यमाननन्ति पण्डिताः प्रभुसम्मिताः वेदाः, मित्रसम्मितानि इतिहासपुराणानि, कान्तासम्मितानि काव्यानीति। वेदेभ्यः अनन्तरं लौकिकवाङ्मये श्रीमद्रामायणमेव आद्यम् काव्यं भवति। रामायणञ्च ब्रह्मणा सङ्कलनेनैव लोके आविर्भूतम्। रामस्य अयनं रामायणम्। रामायणं महाभारतवत् कश्चिदितिहासग्रन्थो भवति। संस्कृतसाहित्ये रामायणवत् प्रसिद्धः लोकप्रसिद्धश्च अन्यो ग्रन्थो नास्तीति वक्तुं शक्यते। नीतिदृष्ट्या, काव्यात्मकदृष्ट्या, लोकोपकारकदृष्ट्या च रामायणस्य महत्त्वं वर्धते। रामायणस्य कर्ता वाल्मीकिमहर्षिः। सः पूर्वं कश्चन किरातः आसीत्। सप्तर्षीणां दर्शनानन्तरं राममन्त्रपूर्वकतया रत्नाकरः वाल्मीकिः सञ्जातः। महाभारते रामायणस्य कथा वर्णिता दृश्यते। पाणिनेः अष्टाध्याय्याम् अपि कैकेयीकौसल्यादयः शब्दाः उपलभ्यन्ते। अतः रामायणं महाभारतात् पाणिनेः च पूर्वमासीदिति स्पष्टम्। रामायणे चतुर्विंशति सहस्र श्लोकाः भवन्ति। रामायणस्य प्रतिसहस्रतमस्य श्लोकस्यादौ गायत्रीमन्त्रस्य एकैकमक्षरं लिखितमासीत्।

**रचनाकालः**

रामायणस्य आविर्भावः कदा अभूदित्यत्र बहुधा विवादो वर्तते। रामायणे महाभारतवर्णितस्य कस्यापि पात्रस्य नाम नोपलभ्यते, परन्तु महाभारते रामकथा लभ्यतेति कारणात् महाभारतात् प्राचीनेति वक्तुं शक्यते।

**रामायणशब्दार्थः**

रामायणम् – रामस्य चरितान्वितम्, अयनम् – शास्त्रम् इति मध्यमपदलोपसमासः। रामस्य चरितमित्युक्ते काव्यस्य अग्रहणात् षष्ठीसमासो न विहितः। अतः रामचरितात्मकं शास्त्रात्मकं काव्यं रामायणमिति फलितोऽर्थः।

**यज्ञस्य स्वरूपम्**

इज्यन्ते देवता अत्र इति यज देवपूजादौ नङ् प्रत्यये यज्ञः सिद्ध्यति। यज्ञ एव समस्तकर्मसु श्रेष्ठकर्मरूपेण ब्राह्मणग्रन्थेषु व्यवहृतः। विश्वस्य सर्वश्रेष्ठतमो देवः प्रजापतिः यज्ञस्वरूपः एव। विष्णोः अपि प्रतीकोऽयमेव यज्ञः भवति। आकाशे जाज्वल्यमानरूपेण प्रकाशितोऽग्निस्वरूपः आदित्योऽपि यज्ञरूप एव। यज्ञादेव सृष्टिः सम्भूता इति आर्योक्तिः। यज्ञस्य वैदिकतत्त्वपरिचयः पुरुषसूक्ते एव प्राप्यते। ब्राह्मणयुगे यज्ञः महनीयत्वे साधनरूपत्वे च आसीत्। अग्निहोत्रस्य अनुष्ठानेन प्राणी सर्वपापात् विमुच्यते। यो नरः अश्वमेधयज्ञं करोति सः ब्रह्महत्यादि समस्तपापकर्मभ्यः मुक्तो भविष्यति। अध्वरोऽपि यज्ञ नाम वेदेषु दृश्यते, निरुक्ते महर्षियास्केन कथितं यदध्वरिति यज्ञ नाम, ध्वरिति हिंसाकर्म, यस्मिन्न हिंसा भवति स एव यज्ञः।

**यज्ञस्य भेदाः**

यज्ञस्य अष्टादश भेदाः सन्ति – तत्र नित्य – नैमित्तिक – काम्य – आध्यात्म – आधिदैविक – आधिभूतभेदैः कर्मयज्ञः षड्विधिः प्रोक्तः। उपासनायज्ञश्च नवविधः उक्तः - 1. निर्गुणोपासना, 2. सगुणोपासना, 3. अवतारोपासना, 4. ऋषिपितृदेवतोपासना, 5. भूतप्रेतासुराद्युपासना, 6. मन्त्रयोगः, 7. हठयोगः, 8. लययोगः, 9. राजयोगश्च। श्रवण – मनव – निधिध्यासनभेदेन ज्ञानयज्ञस्त्रिप्रकारकः प्रतिपादितः। पुनः यज्ञः त्रिविधः सात्त्विकः, राजसः, तमसश्च।

**1. सात्त्विकयज्ञः**

फलापेक्षरहितत्वेन कर्तव्यदृष्ट्या शास्त्रेषु प्रतिपादितरीत्या क्रियमाणः यागः सात्त्विकयज्ञः।

**अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।**
**यष्टव्यमेवेति मनः समाधाय स सात्त्विकः।।**[1]

**2. राजसयज्ञः**

फलापेक्षया दम्भार्थं शास्त्रोक्तरीत्या क्रियमाणः यज्ञः राजसः भवति।

**अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।**
**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्।।**[2]

**3. तामसयज्ञः**

शास्त्ररीतिं विना अश्रद्धया क्रियमाणः यज्ञः तामसः भवति।

**विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।**
**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।।**[3]

द्रव्ययज्ञः, तपोयज्ञः, ज्ञानयज्ञः, स्वाध्याययज्ञः इति विविधाः यज्ञाः भवन्ति।

वैदिकयज्ञपारंपरिकरूपेण अग्नित्रयानुष्ठानं भवति यथा गार्ह्यपत्याग्नि, दक्षिणाग्नि, आहवनीयाग्नि च।

**पञ्चमहायज्ञाः**

गृहस्थैः सर्वैः करणीयेषु कार्येषु पञ्चमहायज्ञाः अन्यतमाः ते च – 1. ब्रह्मयज्ञः, 2. देवयज्ञः, 3. पितृयज्ञः, 4. बलिवैश्वदेवयज्ञः, 5. अतिथियज्ञः। एतैः पञ्चयज्ञैः क्लेशाः दूरी भवन्तीति जनानां विश्वासः।

**यज्ञस्य प्रकाराः**

यज्ञः अष्टविधो भवति – 1. पुत्रकामेष्टियज्ञः, 2. सोमयज्ञः, 3. राजसूययज्ञः, 4. अश्वमेधयज्ञः, 5. अग्निहोत्रयज्ञः, 6. हवान्यज्ञः, 7. वास्तुयज्ञः, 8. नवचण्डीयज्ञश्च।

**रामायणे यज्ञप्रस्तावना**

रामायणे यज्ञस्य महद्वैशिष्ट्यं वर्णितम् अस्ति। बालकाण्डे दशरथः सूर्यवंशजः त्रिभार्यासहितोऽपि अनपत्यकारणात् अतीव दुःखितः आसीत्। सुमन्त्रस्य वाक्यमनुसृत्य ऋष्यश्रुङ्गमहर्षिमाहूय अश्वमेधयागमाचरितवान्। तत्पश्चात् पुत्रकामेष्टियागमप्यकरोत्। तस्माद्यज्ञकुण्डात् उत्पन्नः प्राजापत्यः पुरुषः राज्ञे पायसपूर्णं चारुपात्रं ददौ। राजाऽपि पायसार्धं प्रथमं कौसल्यायै, अवशिष्टार्थं कैकेय्यै दत्तवान्। चतुर्थभागे पुनः अर्धभागं सुमित्रायै दत्वा पुनर्विचिन्त्य अवशिष्टभागमपि तस्यै प्रादात्। अतः दशरथस्य चतुर्णां पुत्राणां आविर्भावः यज्ञादेव जातमित्यवगम्यते। यज्ञ एव रामावतारस्य कारणहेतुरासीत्। पुत्रकामेष्टियज्ञात् दशरथः स्वाभीष्टसत्परिणामफलसिद्धिमवाप्नोत्। साक्षात् विष्णुमूर्तिः एव कौसल्यापुत्रः राम इव, कैकेयीपुत्रः भरतः इव, सुमित्रापुत्रौ लक्ष्मणशत्रुघ्नौ इव आत्मानं चतुर्धा कृत्वा दशरथगृहे प्रसूत इति ज्ञायते।

---

1. भगवद्गीता – 17-11
2. भगवद्गीता – 17-12
3. भगवद्गीता – 17-13

एकदा विश्वामित्रः स्वयागसंरक्षणाय श्रीरामं नेतुमागतवान्। विश्वामित्रः दशरथं प्रत्येवमवदत् –

**अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ।**
**तस्य विघ्नकरौद्वौतु राक्षसौ कामरूपिणौ।।**
**कृतश्रमो निरुत्साहस्तस्माद्देशादपाक्रमे।**
**न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव।।**[1]

यद्यपि विश्वामित्रः यज्ञविघ्नकर्तॄन् विनाशयितुं समर्थोऽपि यज्ञसमये क्रोधो वर्जित इति नियमानुसारेण सः यज्ञसाधनाकाले शापं न ददाति स्म। पूर्वं यज्ञविघ्नकरणे राक्षसाः सर्वदा उत्सुकाः आसन्। किमर्थमिति चेत् राक्षसपतिः रावणः यज्ञशक्तिं परिपूर्णतया जानाति। अतः यत्र यत्र यज्ञाः भवन्ति तत्र तत्र स्वानुचरान् प्रेष्य नाशयति स्म। रावणः पण्डितः तथापि यज्ञादि धर्मानुष्ठानैः एव देवगणाः शक्तिशालिनो भवन्तीति विज्ञाय यज्ञनाशने तत्परो भवति स्म। यत्र यज्ञः तत्र असुराः नानाप्रकारकवेषान् धृत्वा यज्ञप्रक्रियां नाशयितुं प्रयतन्ते। यज्ञकारणात् देवगणाः बलसहिताः असुरगणाः निर्बलाः भवन्ति। देवतानां नाशमाकांक्षमानाः असुराः किं किं कर्तुं शक्नुवन्ति तत्सर्वं कुर्वन्ति स्म। विश्वामित्रस्य यज्ञस्यापि एतादृश स्थितिरेवाऽऽसीत्। अतः यागसंरक्षणाय श्रीरामं याचितुमयं प्रस्थितः। वसिष्ठेन बोधितः दशरथः सलक्ष्मणं रामं विश्वामित्रेण सह प्रेषयामास। ये यज्ञध्वंसाय आगताः तान् राक्षसान् हत्वा यज्ञमरक्षत् रामः। यज्ञसमाप्त्यनन्तरं रामलक्ष्मणसहितः विश्वामित्रः जनकस्य यज्ञे आमन्त्रितः। जनकः पुरोहितैः ऋषिभिस्सह विश्वामित्रस्य अर्चनं पूजनञ्च अकरोत् –

**यत्तोपसदनब्रह्मन्प्राप्तोऽसि मुनिभिः सह।**
**द्वादशाहं तु ब्रह्मर्षे दीक्षामाहुर्मनीषिणः।।**[2]

हे महर्षे! द्वादशदिनदीक्षां स्वीकृत्य अहं यज्ञं कुर्वन्नस्मि। भवान् अत्रागतानां देवतानां द्रष्टुमर्हसि। शिवयज्ञे साक्षात् दैवस्वरूपाः अत्रागताः इति जनकः स्वस्य यज्ञवैशिष्ट्यं विश्वामित्राय न्यवेदयत्। सीतायाः विवाहावसरे जनकः स्वयंवरयज्ञं कृतवान्। रामजननं, सीतायाः विवाहञ्च यज्ञद्वारा सम्प्रवृत्तम्। युद्धकाण्डे रामेण पराजितः रावणः स्वपुत्राय मेघनादाय तान्त्रिकयज्ञकरणे प्रचोदयामास। मेघनादोऽपि निकुम्भिला नामक स्थाने पितुरादेशानुसारं तान्त्रिकयागमाचरितवान्।

**एतस्तुहुत भोक्तारं हुत भुक्सदृशप्रभः।**
**जुहुवे राक्षसश्रेष्ठो विधिवन्मन्त्रसत्तमैः।।**[3]

निकुम्भिलास्थाने अग्नितुल्यतेजस्वी इन्द्रजित् विधिपूर्वकं यज्ञं समाचचार। अयमग्नौ सर्वास्त्राणि ब्रह्ममन्त्रेणाभिमन्त्रितं कृत्वा यज्ञमारब्धवान्। चन्द्र-सूर्य-समस्त ग्रह – नक्षत्रैस्सह आकाशः कम्पमानो आसीत्। मेघनादेन प्रदत्ताः धनुष् – बाण – शूल – अश्व – रथविशेषाः आकाशे अन्तर्धानमभूवन्। अयं नानाप्रकारकशक्तीः प्राप्य रामसैन्याय भ्रममजनयत्। सः मायामन्त्रेण सीतायाः अन्यशरीरं सृष्ट्वा तां हत्वा च रामाय शोकमदात्। तदा विभीषणः रामं प्रत्येवमब्रवीत् –

**चैत्य निकुम्भिलामद्यप्राप्यं होमं करिष्यति।**
**हूतवानुपायातोहिदेवैरपिसवासवैः।।**[4]

---

1. रामायणं – बालकाण्ड – 19. 4,7
2. रामायणं – अयोध्याकाण्ड – 15/50
3. रामायणं – युद्धकाण्ड - 18
4. रामायणं – युद्धकाण्डं – 85-14

हे राम! मेघनादेन क्रियमाणे यज्ञेऽस्य इन्द्रादि देवतासहितः अग्निदेवोऽपि आगमिष्येत्। यदि यज्ञः सम्पन्नश्चेत् इन्द्रादि देवताः मेघनादस्य पक्षे तिष्ठन्ति। अतः प्रथमं यज्ञविनाशः करणीयः इति प्रेरेपितवान्।

यज्ञस्थलं प्राप्य विभीषणः लक्ष्मणाय एवमुवाच –

**सत्वमिन्द्राशनिप्रख्यैः शरैखकिन्परान्।**

**अभिद्रावाशु वैनैतत्कर्म समाप्यते।।**[1]

विभीषणस्य कथनात् लक्ष्मणः इन्द्रवज्रसदृशैः बाणैः राक्षसान् हतवान्। तद्दृष्ट्वा व्याकुलचित्तः मेघनाथः यज्ञसमाप्तिं विना बहिरागतवान्। यज्ञस्य असफलताकारणात् राक्षसैः शक्तिर्न प्राप्ता। रामस्योपरि विजयप्राप्त्यर्थं मुख्यसाधनं यज्ञमिति विश्वसिति रावणः।

युद्धानन्तरम् उत्तरकाण्डे श्रीरामः समस्तप्रजाहिताय यज्ञं कर्तुमचिन्तयत्। रामस्य पूर्वजाः अपि अनेकयज्ञान् समाचरन्ति स्म। श्रेष्ठक्षत्रियः, ब्राह्मणो वा सदा यज्ञानुष्ठाने प्रयत्नशीलो भवेताम्। रामायणे उत्तरकाण्डे श्रीरामः भरतलक्ष्मणौ आहूय प्रेमभावनया एवमपृच्छत् –

**कृतं मया यथातथ्यं द्वितकार्यमनुत्तमम्।**

**धर्मसेतुमथो भूयः कर्तुमिच्छामि राघवौ।।**

**अक्षयश्चाव्ययश्चैव धर्मसेतुर्मतोमम।**

**धर्मप्रवर्धनं चैव सर्वपापप्रणाशनम्।।**[2]

अनुजैस्सह यज्ञश्रेष्ठं राजसूययज्ञकर्तुं स्वाभिप्रायं प्रकटयामास श्रीरामः। तदा अनुजावेवमूचतुः – हे रघुनन्दन! अश्वमेधो महायज्ञः पावनः, सर्वपापविनाशकः। पूर्वकाले इन्द्रोऽपि निरपराधं वृत्रासुरं हत्वा ब्रह्महत्यापातकं प्राप्तवान्। देवताः सर्वाः विष्णुदेवं प्रति गत्वा इन्द्रस्य ब्रह्महत्यापातकनिवारणोपायमभ्यर्थयामासुः। तच्छ्रुत्वा श्रीमहाविष्णुः मम यज्ञं करोति चेत् तमहं पवित्रं करिष्यामीत्यवदत् –

**पुण्येनहयमेधैनमामिष्ट्वा पाकशासनः।**

**पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः।।**[3]

विष्णोः आदेशानुसारम् इन्द्रः अश्वमेधयज्ञं कृत्वा ब्रह्महत्यापातकात् विमुक्तो भूत्वा पुनः इन्द्रपदवीम् अलञ्चकार। लक्ष्मणस्य सूचनानुसारं श्रीरामः वशिष्ठवामदेव – जाबालि – काश्यप ऋषीनाहूय यज्ञाय चर्चाम् अकरोत्। यज्ञे दानादीनाम् आवश्यमित्यपि महर्षिभिरुक्तम्।

**न सीताया पराभार्य्या वव्रे स रघुनन्दनः।**

**यज्ञे यज्ञे चपल्यर्थं जानकी काञ्चनी भवतः।।**[4]

भार्यां विना यज्ञः परिपूर्णो न भविष्यति। अतः श्रीरामः स्वर्णसीतां निर्मापयत्। एवं श्रीरामः प्रतिवर्षं अश्वमेधयज्ञं नाम दशसहस्रवर्षं यावत्, सहस्रवर्षं यावत् फलदायकं वाजपेययज्ञं, अग्निष्ठोमयज्ञं, अतिरात्रं, गोमेधादि यज्ञान् कृत्वा महादक्षिणां दानरूपेण प्रयच्छति स्म।

---

1. रामायणं – युद्धकाण्ड – 86-14
2. रामायणं - उत्तरकाण्ड – 83-3,4
3. रामायणं – उत्तरकाण्ड – 86-21
4. रामायणं – उत्तरकाण्ड – 99-7

**उपसंहारः**

एवं प्रकारेण रामायणे यज्ञस्य वैशिष्ट्यम् प्रस्तावना च अनेकस्थलेषु, दृग्योग्य एव।

**आधारग्रन्थाः**


1. संस्कृतसाहित्येतिहासः – श्रीरामचन्द्रमिश्रः, चौखम्बाविद्याभवन्, वारणासी।
2. श्रीमद्भगवद्गीता – मधुसूदनी संस्कृतहिन्दी व्याख्योपेता, स्वामी श्रीसनातनदेवजीमहाराज्, काशी संस्कृतग्रन्थमाला – काशी।
3. श्रीमद्रामायणम् – वाल्मीकिः – गीताप्रेस् – गोरखपूर।


IJCRT